# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१८)

०५.०३.२०१३

# ५०६. क्रीतात्करणपूर्वात् (४.१.५०)

- पदद्वयम् । क्रीतात्, करणपूर्वात् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- क्रीतान्ताद् अदन्तात् करणादेः स्त्रियां ङीष् स्यात् ।
- वस्त्रक्रीती ।
- वस्त्रक्रीतीति ।

- क्वचिन्न, धनक्रीता ।
- क्वचिन्नेति ।

# ५०७. क्तादल्पाख्यायाम् (४.१.५१)

- पदद्वयम् । क्ताद्, अल्पाख्यायाम् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति, 'क्रीतात्करणपूर्वात्' (४.१.५०) इत्यतः 'करणपूर्वात्' इति च अनुवर्तते ।
- करणादेः क्तान्ताद् अदन्तात् स्त्रियां ङीष् स्याद् अल्पत्वे द्योत्ये ।
- अभ्रलिप्ती द्यौः ।
- अभ्रैरल्पैराच्छन्ना इत्यर्थः ।
- अभ्रैः ईषदाच्छन्नेति वा ।
- अल्पाख्यायाम् किम्?
- चन्दनलिप्ता अङ्गना ।

# ५०८. बहुव्रीहेश्चान्तोदात्तात् (४.१.५२)

- पदत्रयम् । बहुव्रीहेः, च, अन्तोदात्तात् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘क्तादल्पाख्यायाम्’ (४.१.५१) इत्यतः ‘क्ताद्’ इति च अनुवर्तते ।
- बहुव्रीहेः क्तान्ताद् अन्तोदात्ताद् अदन्तात् स्त्रियां ङीष् स्याद् ।

# जातिपूर्वादिति वक्तव्यम् (वा)

- तेन 'बहुनञ्सुकालसुखादिपूर्वान्न' ।
- तेनेति ।
- ऊरुभिन्नी ।
- ऊरुभिन्नीति ।

- नेह - बहुक्रीता ।
- बहुक्रीतेति ।

# जातान्तान्न (वा)

- दन्तजाता ।
- जाताः दन्ताः यस्याः ।

# पाणिगृहीती भार्यायाम् (वा)

- पाणिः गृहीतः यस्याः सा ।
- पाणिगृहीता अन्या ।

# ५०९. अस्वाङ्गपूर्वपदाद्वा (४.१.५३)

- पदद्वयम् । अस्वाङ्गपूर्वपदाद्, वा ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति, ‘क्तादल्पाख्यायाम्’ (४.१.५१) इत्यतः ‘क्ताद्’ इति, ‘बहुव्रीहेश्चान्तोदात्तात्’ इति च अनुवर्तते ।
- पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् ।
- अस्वाङ्गं यत् पूर्वपदं तस्मात् परं यत् क्तान्तं तदन्ताद् बहुव्रीहेः ङीष् वा स्यात् ।
- सुरापीती, सुरापीता ।
- सुरा पीता यया सा ।

- अन्तोदात्तात् किम्?
- वस्त्रच्छन्ना ।
- वस्त्रं छन्नं यस्याः सा ।
- ‘अनाच्छादनात्’ इति उदात्तनिषेधः, अत एव पूर्वेणापि न ङीष् ।

# ५१०. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (४.१.५४)

- चत्वारि पदानि । स्वाङ्गात्, च, उपसर्जनात्, असंयोगोपधात् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति, 'अस्वाङ्गपूर्वपदाद्वा' (४.१.५३) इत्यतः 'वा' इति च अनुवर्तते ।
- असंयोगोपधम् उपसर्जनं यत् स्वाङ्गं तदन्ताद् अदन्तात् प्रातिपदिकाद् वा ङीष् ।
- केशान् अतिक्रान्ता अतिकेशी, अतिकेशा ।
- चन्द्रमुखी, चन्द्रमुखा ।
- चन्द्रः इव मुखं यस्याः इति बहुव्रीहिः ।

- संयोगोपधात्तु सुगुल्फा ।

- उपसर्जनात् किम्?
- शिखा ।

- स्वाङ्गं त्रिधा -
- अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।
- अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥ (महाभाष्यम्)

- ‘अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्’ ।
- अद्रवमिति ।
- सुस्वेदा, द्रवत्वात् ।
- सुस्वेदेति ।

- सुज्ञाना, अमूर्तत्वात् ।
- सुमुखा शाला, अप्राणिस्थत्वात् ।
- सुशोफा, विकारजत्वात् ।

- ‘अतत्स्थं तत्र दृष्टं च’ ।
- अतत्स्थमिति ।
- सुकेशी, सुकेशा वा रथ्या, अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् ।

- ‘तेन चेत्तत्तथा युतम्’ ।
- तेन चेदिति ।
- सुस्तनी, सुस्तना वा प्रतिमा, प्राणिवत्प्राणिसदृशे स्थितत्वात् ।